Roll No : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# UGA–241

## B.A. (Part–II) Examination, 2021

## SANSKRIT

Paper - I

**(नाटक, छन्द, संस्कृतसाहित्येतिहास एवं व्याकरण)**

*Time : 1½ Hours* ] [ *Maximum Marks : **100***

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

**नोट** :– अस्मिन् प्रश्ने दश उपप्रश्नाः सन्ति। ते सर्वे समाधेयाः वर्तन्ते। तेषु यथेच्छं **पञ्च**प्रश्नाः संस्कृतेन उत्तरणीयाः सन्ति।

1. (i) 'राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः' स्वपाठ्यग्रन्थानुसारं कस्य पात्रस्य उक्तिरियमस्ति ?

   (ii) आत्मानं तिरस्कृतं मत्वा सुलभकोपः अभ्यागतः महर्षिः दुर्वासा अनन्यमानसां शकुन्तलां किं शपति ?

(iii) अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्यादौ राज्ञः दुष्यन्तस्य का नाम पत्नी गीतिकां गायति ?

(iv) पाठ्यनाटके मातलिः क आसीत् ?

(v) किन्नाम छन्दः त्रिमुनियतियुतमस्ति ? तल्लक्षणमपि गणनिर्देशपुरस्सरं लेख्यम्।

(vi) 'यास्यत्यद्य शकुन्तलेति हृदय संस्पृष्टमुत्कण्ठया' इत्यत्र छन्दो नाम प्रदर्श्य तल्लक्षणमपि लिखत।

(vii) पाठ्यग्रन्थानुसारं 'कर्ता' इति पदस्य सूत्रनिर्देशपूर्वकं रूपसिद्धिः कार्य।

(viii) ''तद् अस्याऽस्ति अस्मिन् इति मतुप्'' ''एति स्तुशास्-वृ-दृ-जुषः क्यप्'' चेत्यनयोः द्वयोः सूत्रयोः व्याख्या कार्या।

(ix) मेघदूतस्यादौ कालिदासेन कीदृशः यक्षः चित्रितः ?

(x) संस्कृतस्य यथेष्टं पञ्चनाटकानां नायक नायिकयोः नामनिर्देशं कुरुत।

## खण्ड–ब

**नोट** :– अस्मिन् खण्डे द्वितीयतः अष्टम प्रश्नं यावत् **सप्त**प्रश्नाः सन्ति। तेषु केचन पञ्चप्रश्ना समाधेयाः वर्तन्ते।

2. सप्रसङ्गं अनुवादः करणीयाः–

(क) चलापाङ्गां दृष्टिं स्पृशसि बहुलो वेपथुमतीं

रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।

करौ व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं

वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती॥

(ख) तपति तनुगात्रि! मदनस्त्वामनिशं मां पुनर्दहत्येव।

ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥

3. निम्नाङ्कितयोः पद्ययोः सप्रसङ्गं सान्वयञ्च व्याख्या कार्या–

(क) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।

न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

(ख) यात्येकतोऽस्तशिखरं पतिरोषधीना-

मविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।

तेजो द्वयस्य युगपद् व्यसनोदयाभ्यां

लोको नियम्यत इवात्मदशान्तरेषु॥

4. अधस्तनयोः सप्रसङ्गं प्रकृति प्रत्यय पुरस्सरं व्याख्या विधेया—

(क) अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-

स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।

सामान्य प्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया

भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः॥

(ख) तदेषा भवतः कान्ता त्यज वैनां गृहाण वा।

उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी॥

5. निम्नलिखितयोः पद्ययोः सप्रसङ्गं सुस्पष्टञ्च भावार्थो लेख्यः—

(क) अर्थो हि कन्या परकीय एव

तामद्य सम्प्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं

प्रत्यर्पितन्यास इवान्तरात्मा॥

(ख) शापादसि प्रतिहता स्मृतिरोधरुक्षे

भर्तुरपेत तमसि प्रभुता तवैव।

छाया न मूर्च्छति मलोपहते प्रसादे

शुद्धे तु दर्पणतले सुलभावकाशा॥

6. द्वयोर्मध्ये कस्यचिदेकस्य छन्दसः गणादि प्रदर्शनपुरस्सरं लक्षणं विलिख्य तदुदाहरणमपि लिखत।

(ii) मन्दाक्रान्ता

(iii) शार्दूलविक्रीडितम्

7. निम्नाङ्कितानां सर्वेषां सूत्राणां सोदाहरणं व्याख्या कार्या–

(क) ''कृत्य ल्युटो बहुलम्''।

(ख) ''लटः शतृ-शानचावप्रथमा समानाधिकरणे''।

(ग) ''रेवत्यादिभ्यष्ठक्''।

(घ) ''वयसि प्रथमे''।

8. निम्नेषु ग्रन्थेषु यथेच्छं टिप्पणी द्वयी लेख्या–

(क) शिशुपालवधम्

(ख) उत्तररामचरितम्

(ग) दशकुमारचरितम्।

**खण्ड–स**

**नोट** :– अस्मिन् खण्डे चतुर्षु प्रश्नेषु यथेष्टं **द्वौ** उत्तरणीयौ।

9. अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य सारांशं विलिख्य तत्र तदुपादेयतां प्रदर्शयत।

10. अभिज्ञानशाकुन्तलानुसारं राज्ञो दुष्यन्तस्य चरितं चित्रयत।

11. सविस्तरं रामायणमहाभारतयोः चित्रितं लोकजीवनं विवेचयत।

12. महाकवि बाणभट्टस्य व्यक्तित्वं कृतित्वञ्च प्रदर्शयत।